Shri Raghunatha Temple MSS. Library,
JAMMU

No. ११८२ क्र

Title विश्वामित्रकल्पे त्रिकाल संध्याविधानम्

Author

Extent १२ पत्राणि Age

Subject धर्मशास्त्रम्

विश्वामित्रसंहितायां

त्रिकाल संध्याविधिः

११७२

92

सं० ११६२

उत्तमसतारकोपै मध्यमालुप्ततरका॥ अधमासूर्यसहि
ता प्रातःसंध्या विधीयते॥ उत्तमासूर्यसहिता मध्यमालुप्ततर
का॥ अधमातारकोपेता सायंसंध्या विधीयते॥२॥

सं. २

अथप्रातःसंध्यालिख्यते॥ प्रातःसंध्याप्रारंभः॥ आचम्य॥ प्राणानायम्य॥ अथ
पुराणाचमनं॥ ॐकेशवायनमःस्वाहा॥ १॥ ॐनारायणायनमः॥ २॥ ॐमाध
वायनमः॥ ३॥ ॐगोविंदायनमः॥ ४॥ ॐविष्णवे॥ ५॥ ॐमधुसूदनाय॥ ६॥ ॐत्रि
विक्रमाय॥ ७॥ ॐवामनाय॥ ८॥ ॐश्रीधराय॥ ९॥ ॐहृषीकेशाय॥ १०॥ ॐप
द्मनाभाय॥ ११॥ ॐदामोदराय॥ १२॥ ॐसंकर्षणाय॥ १३॥ ॐवासुदेवाय॥ १४॥ ॐ
प्रद्युम्नाय॥ १५॥ ॐअनिरुद्धाय॥ १६॥ ॐपुरुषोत्तमाय॥ १७॥ ॐअधोक्षजाय॥ १८
ॐनारसिंहाय॥ १९॥ ॐअच्युताय॥ २०॥ ॐजनार्दनाय॥ २१॥ ॐउपेंद्राय॥ २२॥
ॐहरये॥ २३॥ ॐश्रीकृष्णायनमः॥ २४॥ प्राणायामः॥ प्रणवस्यपरब्रह्मऋ
षिः॥ परमात्मादेवता॥ दैवीगायत्रीछंदः॥ सप्तानांव्याहृतीनांविश्वामित्रज
मदग्निभरद्वाजगौतमः॥ अत्रिर्वसिष्ठःकश्यपइत्येतेसप्तऋषयः॥ अ
ग्निर्वायुःसूर्योबृहस्पतिर्वरुणइंद्रोविश्वेदेवादेवता॥ दैवीगायत्र्युष्णिग
नुष्टुब्बृहतीपंक्तिस्त्रिष्टुब्जगत्यश्छंदांसि॥ सप्तानांव्याहृतीनांप्रजापतिऋ

षिः प्रजापतिर्देवता ॥ देवीबृहतीछंदः ॥ गायत्र्या गाथिनो विश्वामित्रऋषिः
सविता देवता गायत्रीछंदः ॥ शिरोमंत्रस्य वामदेवऋषिः ॥ परंब्रह्मदेवता ॥
अग्न्याद्याः रीगायत्रीछंदः ॥ एतेषां प्राणायामे विनियोगः ॥ ॐ भूः ॥ ॐ भुवः ॥ ॐ स्वः
ॐ महः ॥ ॐ जनः ॥ ॐ तपः ॥ ॐ सत्यं ॥ ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो
देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ ॐ आपो ज्योती रसोमृतं ब्रह्म भूर्भु
वः स्वरोम् ॥ त्रिवारं पठित्वा ॥ अथ प्रातः संध्याध्यानं पठित्वा ॥ प्रातः संध्या गायत्री
कुमारी रक्तांगी रक्तवर्णा रक्तवाससां हंसस्कंधसमारूढां पाशांकुशाक्षमालां
कमंडलुधरां ऋग्वेदसहितां ब्रह्मदैवत्यां रजोगुणयुतां भूर्लोकव्यवस्थितां
आदित्यपथगामिनीमावाहयाम्यहं देवीमायांतीं सूर्यमंडलात् ॥ पूर्वोक्त
एवंगुणविशेषणविशिष्टायां पुण्यतिथौ मम उपात्तदुरितक्षयार्थं श्रीपरमे
श्वरप्रीत्यर्थं प्रातः संध्यामुपासिष्ये ॥ आपो हिष्ठेति त्र्यृचस्य अंबरीषः सिं
धुद्वीपऋषिः ॥ आपो देवता गायत्रीछंदः ॥ मार्जने विनियोगः ॥ ॐ आपो हिष्ठा

सं. २
2

मयोभुवः ॥ ओं ता न ऊर्जे दधातन ॥ ओं महे रणाय चक्षसे ॥ ओं यो वः शिवतमो रसः ॥
ओं तस्य भाजयतेह नः ॥ ओं उशतीरिव मातरः ॥ ओं तस्मा अरंगमाम वः ॥ ओं यस्य क्षयाय
जिन्वथ ॥ ओं आपो जनयथा च नः ॥ ओं सूर्यश्च मेति मंत्रस्य नारायण ऋषिः ॥ सूर्य
मामन्युमन्युपतयो ब्रह्म देवता प्रकृती छंदः ॥ अंतरस्तुह्य ये प्रातःसंध्याचम
नेविनि- ॥ ओं सूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः ॥ पापेभ्यो रक्षंतां ॥ य
द्रात्र्या पापमकार्षं ॥ मनसा वाचा हस्ताभ्यां ॥ पद्भ्यामुदरेण शिश्ना ॥ रात्रिस्तदवलं
पतु ॥ यत्किंचिदुरितं मयि ॥ इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा
इत्याचमनं ॥ ओं आपो हिष्ठेति नवर्च्चस्य सूक्तस्य ॥ अंबरीष सिंधुद्वीप ऋषिः ॥ आ
पो देवता गायत्री छंदः ॥ पंचमी वर्द्धमाना सप्तमी प्रतिष्ठा ॥ ओं अंत्ये द्वे अनुष्टुभौ मार्ज
नेविनियोगः ॥ आपो हिष्ठेति त्र्यृचेन पूर्ववन्नवमार्जनं ॥ ओं शन्नो देवीरभिष्टय आ
पो भवंतु पीतये ॥ शंयोरभिस्रवंतु नः ॥ ओं ईशाना वार्याणां क्षयंतीश्चर्षणीनां ॥
आपो याचामि भेषजं ॥ ओं अप्सु मे सोमो अब्रवीदंतर्विश्वानि भेषजा ॥ अग्निंच

विश्वशंभुवमापश्च विश्वभेषजीः ॥ ॐ आपः पृणीत भेषजं वरूथं तन्वे मम
ज्योक्च सूर्यं दृशे ॥ ॐ इदमापः प्रवहत यत्किंचिद्दुरितं मयि ॥ यद्वाहमभिदुद्रो
ह यद्वा शेप उतानृतं ॥ ॐ आपो अद्यान्वचारिषं रसेन समगस्महि ॥ पयस्वानग्न आ म२
गहि तं मा संसृज वर्चसा ॥ ॐ सस्रुषीस्तदपसो दिवा नक्तं च सस्रुषीः ॥ वरेण्य
क्रतुरहमा देवीरवसे हुवे ॥ ॐ भद्रन्न इति मंत्रस्य ऐन्द्रो विमद ऋषिः ॥ अग्निः पर
मात्मा देवता ॥ एकपदा विराट् छंदः ॥ ॐ भद्रं नो अपि वातय मनः ॥ त्रिवारं पठि
त्वा ॥ ॐ ऋतं चेति त्र्यृचस्य सूक्तस्य मधुछंदसो अघमर्षण ऋषिः ॥ भाववृ
त्तो देवता ॥ अनुष्टुप् छंदः ॥ अघमर्षणे विनि० ॥ ॐ ऋतं च सत्यं चाभीद्धात्तप
सोऽध्यजायत ॥ ततो रात्र्यजायत ॥ ततः समुद्रो अर्णवः ॥ समुद्रादर्णवादधि संवत्स
रो अजायत ॥ अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ सूर्याचंद्रमसौ धाता य
था पूर्वमकल्पयत् ॥ दिवं च पृथिवीं चांतरिक्षमथो स्वः ॥ अनेन मंत्रेण नासाग्र
तोयं निधाय भूमौ निक्षिपेत् ॥ पुनराचम्य प्राणायामं कृत्वा ॥ अथ सलत्तृणाग्रा

सं॰ २

3

णायामं कृत्वा ॥ ॐ गायत्र्या गायत्री छंदः विश्वामित्र ऋषिः सविता देवता गायत्री
छंदः ॥ सवितृ सूर्यार्घ्यप्रदाने विनियोगः ॥ ॐ भूर्भुवः ॥ तत्स॰ ऋत्क ॥ श्री सवित्रे इदमर्घ्यं
न मम ॥ इति न्यासः ॥ इति त्रिवारं अर्घ्यं दत्वा मुक्तांगुष्ठेनांजलिना उदकं गृहीत्वा
मंत्रांते अर्घ्यं दत्वा ॥ अथ ब्रह्मप्रहरणं ॥ ॐ अस्य श्री ब्रह्मास्त्र प्रयोग मंत्रस्य ॥ ब्रह्मा
विष्णु महेश्वरा ऋषयः ॥ सविता देवता गायत्री छंदः ॥ असुर संहारणार्थे ब्रह्मा
स्त्र मंत्र प्रहरणे विनि॰ ॥ ॐ गच्छ देवी सुरश्रेष्ठ गायत्री ब्रह्मरूपिणी ॥ सूर्यार्घ्यं च
मपादत्तं दैत्यानां च वधु कुरु ॥ अथ उपसंहरणं ॥ ॐ अस्य श्री गायत्री उपसंहर
णमंत्रस्य ॥ भगवान् ऋषिः मूलमंत्रप्रकृतिर्देवता ॥ गायत्री छंदः ॥ गायत्र्युपसंह
रणे विनियोगः ॥ अथ न्यासः ॥ ॐ आपो अंगुष्ठाभ्यां नमः ॥ ॐ ज्योतिः तर्जनीभ्यां न
मः ॥ ॐ रसो मध्यमाभ्यां नमः ॥ ॐ अमृतं अनामिकाभ्यां नमः ॥ ब्रह्मकनिष्ठि
काभ्यां नमः ॥ ॐ भूर्भुवः स्वरो करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादि
न्यासः ॥ अथ ध्यानं सोहमर्कमहं ज्योतिरर्कज्योतिरहं शिवः ॥ आत्मज्योतिर

हंमृक्त सर्वज्योतिरसावहं॥ हरोमिपापस्थानंमेविद्धि उड्डगोमिपापस्थानंमेविद्धि
संभगोमिपापस्थानंविद्धि॥ आवायव्ययावायव्यायवायव्ययवस्था॥ आवीयव्य
यावायव्या॥ आपऊर्ध्वेउत्तिपति॥ ॐप्रातर्देवीमदितिंजो हवीमिमध्यंदिन
उदितासूर्यस्यरायेमित्रावरुणासर्वतातेलेतोकायतनयायशंयोः॥ अथउ
दकंगृहीत्वा॥ असावादित्योब्रह्म॥ इतिप्रदक्षिणंकृत्वा॥ धाम्नोधाम्नोराजन्नितो
वरुणनोमुंच॥ यदापोअघ्न्याइतिवरुणेतिशपामहेततोवरुणनोमुंच॥ मद्रवा
२ पोमाप्रधीर्हिसंतोविश्वव्यचाअस्तेतोवरुणनोमुंच॥ ॐभूःतत्सवितुर्वरेण्यं
ॐभूरोमावाहयामि॥ ॐभुवःभर्गोदेवस्यधीमहि॥ ॐभुवोरोमावा॰॥ ॐस्वःधि
योयोनःप्रचोदयात्॥ ॐस्वरोमावा॰॥ आगच्छवरदेदेवीगायत्रीब्रह्मरूपिणी॥
जपानुष्ठानसिध्यर्थंप्रविश्यहृदयंमम॥ उत्तिष्ठदेविगंतव्यपुनरागमनायच॥
अर्घेषुदेविगंतव्यंप्रविश्यहृदयंममः॥ २॥ प्रातस्तुदेविगंतव्यंप्रविश्यहृदयं
मम॥ अथअर्घ्यांनिसंध्यातर्पणंकृत्वा॥ आचम्य॥ प्राणानायम्य॥ गायत्र्यागा

सं० ४

पत्रीछंदः॥ विश्वामित्रऋषिः॥ ब्रह्मादेवता॥ गायत्रीछंदः प्रातःसंध्यातर्पणे
विनियोगः॥ ॐ भूःपुरुषं तर्पयामि॥१॥ ॐ ऋग्वेदं तर्पयामि॥२॥ ॐ मंडलं तर्पयामि॥३॥ ॐ हि
रण्यगर्भं तर्प०॥४॥ ॐ ब्रह्माणं तर्प०॥५॥ ॐ गायत्रीं तर्प०॥६॥ ॐ वेदमातरं तर्प०॥७॥
ॐ सांकृतीं तर्प०॥८॥ ॐ संध्यां तर्प०॥९॥ ॐ कुमारीं तर्प०॥१०॥ ॐ ब्राह्मीं तर्प०॥११॥
ॐ उषसीं तर्प०॥१२॥ ॐ निमृजीं तर्प०॥१३॥ ॐ सर्वार्थसिद्धिकरीं तर्प०॥१४॥ ॐ स
र्वमंत्राधिपतीं तर्प०॥१५॥ ॐ भूर्भुवःस्वःपुरुषं तर्प०॥१६॥ दर्भोन्नतलीयं॥ इत्युप
लक्त्वा प्राणायामभेदं॥ कृत्वा दिग्बंधस्य प्रसेजनवक्तुरेधीचोसास्या देवी
नदवरोयोमोत्सयंहिपादोत्यधिभवत॥ इति दिग्बंधः॥ इति चतुर्थः॥ ॐ
मित्येकाक्षरं ब्रह्माग्निर्देवता॥ ब्रह्माऋषिः गायत्रीछंदः॥ परब्रह्मस्वरू
पीगायत्री आवाहने विनि०॥ आयातु वरदा देवी अक्षरं ब्रह्मसंमितं॥ गाय
त्रीछंदसां मातेदं ब्रह्म जुषस्व मे॥ यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्य
ते॥ यद्रात्र्यात्कुरुते पापं तद्रात्र्यात्प्रतिमुच्यते॥ सर्ववर्णे महादेवी संध्या

विसरस्वती॥ ॐ ओजोसि॥ ॐ तेजोसि॥ ॐ सहोसि॥ ॐ भ्राजोसि॥ ॐ बल
मसि॥ ॐ देवानां धाम नामासि॥ ॐ विश्वमसि विश्वायुः॥ ॐ सर्वमसि सर्वा
युः॥ ॐ अभिभुरों गायत्रीमावाहयामि॥ ॐ सावित्रीमावाह०॥ ॐ सरस्वतीमा
वाह०॥ ॐ ऋषिमावाह०॥ ॐ बलमावाह०॥ ॐ श्रियमावाह०॥ ॐ छंद ऋषीदेवता
मावाह०॥ ॐ गायत्र्या गायत्रीछंदः विश्वामित्र ऋषिः॥ सविता देवता गायत्री
छंदः रक्तवर्णाः अग्निमुखं विष्णुहृदयं रुद्रो ललाटं पृथ्वी
कुक्षिः त्रैलोक्यं च रौप्य॥ सांख्यायनसगोत्रं॥ त्रिपदा गायत्री॥ मम समल
पापक्षयार्थं श्रीपरमेश्वरप्रीत्यर्थं प्रातःसंध्या त्रिपदा गायत्री यथा ज्ञाने
न जपमहं करिष्ये॥ अघमर्षण मोचने॥ अघमर्षण पापविमोचनी विद्या
मंत्रस्य॥ नूतनवमसि एक त्रीन्प्रजायति ऋषिः॥ शान्तिर्देवता॥ गायत्री छंदः
कृतपापविमोचनार्थे जपे विनियोगः॥ ॐ गायत्री सततं भजामि विश्वरूपा
नु यस्मिन्देवा जाताः प्रजायन्त॥ सप्तेनाम प्रजापतिमा॥ उक्तिः सावित्रीं भजे

सं. ५

5

विश्वमवसंसृजंति ॥ इति ब्रह्मशापविमुक्ता भव ॥ २ ॥ अस्य श्री विश्वामित्र शाप
विमोचन विधामंत्रस्य ॥ निग्रहिता शक्तिर्देवता ॥ गायत्री छंदः विश्वामित्र शा
पविमोचनार्थे जपे विनियोगः ॥ गायत्रीं भजामि ॥ सुमुखी विश्वगर्भा यदुद्भ
वाद्देवाः स्वर्गौ दिवि विश्वसृष्टिं तत्कल्याणीमभिषृतिं करीं यप ययन्तु सानिःस्व
वेदगर्भा विश्वामित्र शापविमुक्ता भव ॥ ३ ॥ अस्य श्री वशिष्ठ शापविमोचन वि
धामंत्रस्य ॥ निग्रहानुग्रहकर्ता वशिष्ठ ऋषिः ॥ शक्तिर्देवता गायत्री छंदः ॥ व
शिष्ठ शापविमोचनार्थे जपे विनि ॥ ॐ सोहमास्य नु वहुत्पत्री दिव्यासिद्धे सर
स्वती ॥ अजरे अमरे चैव ब्रह्मरूपीन मोस्तुते ॥ इति वशिष्ठ शापविमुक्ता भव ॥
॥ ४ ॥ अथ यथोक्त प्राणायामस्य ॥ सव्याहृतीं सप्रणवां गायत्रीं शिरसा
सह ॥ त्रिः पठेदायतः प्राणान् प्राणायामस्य लक्षणं ॥ अत्र विशेषमाह ॥ गा
यत्रीमस्य संजापेन बहुप्रकारः ॥ अथ गायत्रीन्यासं कृत्वा ॥ ॐ भूः पादाभ्यां नमः ॥
ॐ भुवः जानुभ्यां नमः ॥ ॐ स्वः कटिभ्यां ॥ ॐ महः नाभ्यै ॥ ॐ जनः हृदयाय ॥

ॐ तपः कंठाय॥ ॐ सत्यं ललाटाय॥ ॐ बीजं एकशक्तिनः॥ प्राणं ध्यायेत्कीलकं॥
ॐ तत्सवितुः अंगुष्ठात्मने अंगुष्ठाभ्यां नमः॥ ॐ वरेण्यं विष्णात्मने तर्जनीभ्यां नमः॥ एंप २
ॐ भर्गो देवस्य रुद्रात्मने मध्यमाभ्यां नमः॥ ॐ धीमहि मायात्मने अनामिकाभ्यां॥
ॐ धियो यो नः शक्त्यात्मने कनिष्ठिका॥ ॐ प्रचोदयात् सर्वात्मने करतलकर
पृष्ठाभ्यां॥ एवं हृदयादि॥ अथ गायत्री अक्षरन्यासं कृत्वा॥ ॐ तकारं पादांगु
ष्ठयोः॥ ॐ त्सकारं गुल्फयोः॥ ॐ विकारं जंघयोः॥ ॐ तुकारं जान्वोः॥ ॐ वका
रं ऊर्वोः॥ ॐ रेकारं गुदे॥ ॐ णिकारं लिंगे॥ ॐ यकारं कटयां॥ ॐ भकारं नाभौ॥
ॐ र्गोकारं उदरे॥ ॐ देकारं स्तनयोः॥ ॐ वकारं हृदये॥ ॐ स्यकारं कंठे॥ ॐ धिका
रं मुखे॥ ॐ मकारं तालुदेशे॥ ॐ हिकारं नासाग्रे॥ ॐ धिकारं नेत्रयोः॥ ॐ योकारं
भ्रूमध्ये॥ ॐ योकारं ललाटे॥ ॐ नकारं पूर्वमुखे॥ ॐ चोकारं पश्चिममुखे॥ ॐ
दकारं उत्तरमुखे॥ ॐ याकारं मूर्ध्नि॥ ॐ व्यंजनतकारं सर्वव्यापि॥ अथ ध्यानं॥
मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकु।

सं· ६

रांनत्वाथ्वर्णात्मिकां॥ गायत्रीवरदाभयांकुशाकरांशूलंकपालंगदांशंखच
क्रमथारविंदयुगलंहस्तैर्वहंतींभजे॥ अथमुद्रा॥ सुमुखंसंपुटंचैववितंतंवि
स्तृतंतथा॥ द्विमुखंत्रिमुखंचैव चतुःपंचमुखंतथा॥ षण्मुखाधोमुखंचैवव्या
पकांजलिकंतथा॥ शकटंयमपाशंचग्रथितंसन्मुखोन्मुखं॥ २ प्रलंबमु
ष्टिकंचैवमत्स्यःकूर्मवराहकं॥ सिंहाक्रांतंमहाक्रांतंमुद्गरंपल्लवंतथा॥ ३॥ च
तुर्विंशतिमुद्राश्चगायत्र्यादौप्रदर्शयेत्॥ एतामुद्रानजानातिगायत्रीनि
ष्फलाभवेत्॥ ४॥ अथशतात्तरागायत्रीएकवारंजपेत्॥ शतात्तरागायत्री
लिख्यते॥ ॐतत्स०क्रमः॥ १॥ जातवेदसे०क्रमः॥ २॥ त्र्यंबकं०क्रमः॥ ३॥ इतिशतात्ता
रः॥ अथगायत्रीजपंकुर्यात्॥ ॐभूर्भुवःस्वः॥ ॐतत्सवि॰॥ ॐभर्गोदे॰॥ ॐधि
योयोनः॥ ॐम्॥ अथतुर्यागायत्री॥ अथसंकल्पयथाशक्त्यात्रिपदागाय
त्रीअष्टमांशेनतुरीयपादसंयुक्तंजपमहंकरिष्ये॥ अथन्यासः॥ ॐपरोहृ
दयाय॰॥ ॐरजसेशिरसे॥ ॐअसावदोंशिखायै॥ ॐपरोरजसेकवचा॰।

शा०कि०२

ॐ अस्मावदोंनेत्रत्रयाय ॥ इति षडंगन्यासः ॥ अथ गायत्र्या ध्यानं ॥ हृदयविकसि

तैर्ययं सोमार्काग्निबिंबं प्रणवमयमचिंत्यं यस्य पादे प्रकल्प्यं ॥ अचल

पंचमस्तत्त्वं ज्योतिशाकाशमात्रं भवतु मनसोमेवा सृष्टदेवः प्रतिष्ठः ॥ इति ध्या

नं ॥ अथ मुद्रा ॥ त्रिमूलयोनि सुरभिमैलेतमालोचलिंगकं ॥ अंबुजं च महा

मुद्रामितनस्त्वं प्रदर्शयेत् ॥ अथ जपः ॥ ॐ भूर्भुवः स्वः ॥ ॐ तत्सवि० ॥ ॐ भर्गोदे०

ॐ धियो यो नः ॥ ॐ परोरजसेसावदोम् ॥ अथ उत्तरांगः ॥ ॐ आपो ज्योती० ॥ ॐ ज्यो

तिःस्वत्नुषे ॥ ॐ रसो मुखे ॥ ॐ अमृतं जानोः ॥ ॐ ब्रह्म हृदये ॥ ॐ भूर्भुवः स्वरों ॥

शिरसि ॥ इत्युत्तरांगः ॥ अथ उत्तर ध्यानं ॥ मूलाधारे हुतवहकुलं भूर्भुवः स्व

कत्रूपं मूलस्थाने शशिकरकलितं तत्सवितुर्वरेण्यं ॥ भर्गोदेवस्यमध्ये स

वितुसनुसदृशं धीमहि त्येकत्रूपं धियो यो नः परमगमनस्य प्रचोदयात्स्वरो

तो ॥ इति ध्यानं ॥ अथ पूजनं ॥ ॐ लं पृथिव्यात्मने गंधं समर्पयामि ॥ अंगुष्ठेन

कनिष्ठिकां स्पृशेत् ॥ ॐ हं आकाशात्मने पुष्पं समर्प० ॥ इति जनेन्यां गुष्ठस्प

सं·
७

शेत॥ ॐ यं वायव्यात्मने धूपं समर्पये· ॥ ॐ रं आग्नेयात्मकं दीपं समर्पये· ॥ ॐ वं अमृ
तात्मकं नैवेद्यं समर्पयामि· ॥ ॐ यं रं लं वं शं षं सं हं पुष्पांजलिं समर्पये· ॥ अथ मुद्रा
सुरभिज्ञान मत्स्यं च योनि कूर्मं च पंकजं॥ लिंगं निर्वाणकं चैव ब्रजपात्ने ऽक्षि प्र
दर्शयेत्॥ ॥ यदक्षरपदभ्रष्टं स्वरव्यंजनवर्जितं॥ तत्सर्वं क्षम्यतां देवी कश्यप
प्रियवादिनी॥ ॥ इति प्राणायामनमस्कारं कृत्वा॥ अथ गायत्री तर्पणं॥ गायत्र्या
गायत्रीछंदः विश्वामित्रऋषिः सविता देवता॥ गायत्रीछंदः गायत्रीतर्प
णे विनि· ॥ ॐ भूः ऋग्वेदपुरुषं तर्पये· ॥ ॐ भुवः यजुर्वेदपुरुषं तर्पये· ॥ ॐ स्वः साम
वेदपुरुषं तर्पये· ॥ ॐ महः अथर्ववेदपुरुषं तर्पये· ॥ ॐ जनः पुरुष इतिहासपु
राणं तर्पये· ॥ ॐ तपः सर्वांगपुरुषं तर्पये· ॥ ॐ सत्यं सत्यलोकपुरुषं तर्पये· ॥ ॐ भूः
भूर्लोकपुरुषं तर्पये· ॥ ॐ भुवः भुवर्लोकपुरुषं तर्पये· ॥ ॐ स्वः स्वर्लोकपुरुषं
तर्पये· ॥ ॐ भूः एकपादागायत्रीं तर्पये· ॥ ॐ भुवः द्विपदागायत्रीं तर्पये· ॥ ॐ स्वः त्रिप
दागायत्रीं तर्पये· ॥ ॐ भूर्भुवः स्वः चतुष्पदागायत्रीं तर्पये· ॥ ॐ उषसीं तर्पये· ॥ ॐ गा

यत्रीतर्पे॰ ॥ ॐ सावित्रीं तर्पे॰ ॥ ॐ सरस्वतीं तर्पे॰ ॥ ॐ वेदमातरं तर्पे॰ ॥ ॐ पृथिवीं त
र्पे॰ ॥ ॐ अजां तर्पे॰ ॥ ॐ कौशिकीं तर्पे॰ ॥ ॐ सांकृतीं तर्पे॰ ॥ ॐ सर्वजितं तर्पे॰ ॥ २५ ॥
इति गायत्रीतर्पणं ॥ अथ तर्पणकारका ॥ मंत्रैरेभिश्च यो नित्यं चतुर्विंशति
संमितैः ॥ गायत्रीं तर्पयेत्तेन तर्पितं चराचरं ॥ अथ उपस्थानं ॥ मित्रो जना
न्यातयति ब्रुवाणस्येत्यस्य ॥ गाथिनो विश्वामित्र ऋषिः ॥ मित्रो देवता त्रि
ष्टुप् छंदः मंत्रस्य तस्य गायत्र्याः मित्र उपस्थाने विनि॰ ॥ ॐ मित्रो जनान्या
तयति ब्रुवाणो ... र्गीः ॥ ३ ॥ तद्वो दिव इति मंत्रस्य गोतमो वामदेव ऋषिः ॥ उपा
देवता त्रिष्टुप् छंदः ॥ ------ ॥ स्थाने विनि॰ ॥ ॐ तद्वो दिवो दुहितरो विभातीः
ऋक् ॥ ४ ॥ जातवेदस इति मंत्रस्य कश्यप ऋषिः ॥ जातवेदा दुर्गाग्निर्देवता ॥
त्रिष्टुप् छंदः शांत्यर्थे जपे विनियोगः ॥ ॐ जातवेदसे सुनवाम सोमं ऋक् ॥ ५
मानस्तोक इति मंत्रस्य कुत्स ऋषिः रुद्रो देवता जगती छंदः शांत्यर्थे जपे
विनि॰ ॥ ॐ मानस्तोके तनये ऋक् ॥ ६ ॥ त्र्यंबक इति मंत्रस्य मैत्रावरुणवसि

सं.
ठ
8

ष्ठऋषिः त्र्यंबको रुद्रो देवता अनुष्टुप्छंदः शांत्यर्थे जपे विनियोगः ॥ ॐ त्र्यंब
कं यजामहे ऋचा ॥ ९ ॥ समानी व आकूति मंत्रस्य संवनन ऋषिः ॥ संज्ञानं देवता
अनुष्टुप्छंदः शांत्यर्थे जपे विनियोगः ॥ ॐ समानी व आकूति ऋचा ॥ १० ॥ तच्छं
योरिति मंत्रस्य शंयु ऋषिः ॥ विश्वे देवा देवता शाक्वरी छंदः ॥ शांत्यर्थे जपे वि
नियोगः ॥ ॐ तच्छंयोरावृणीमहे ऋचा ॥ ११ ॥ अथ दिशा प्रार्थना ॥ ॐ प्राच्यै दि ॥ ॐ
इंद्राय नमः ॥ ॐ आग्नेय्यै दि अग्नये ॥ ॐ दक्षिणा दिशे यमाय ॥ ॐ निर्ऋत्यै दि
शे निर्ऋतये ॥ ॐ प्रतीच्यै दिशे वरुणाय ॥ ॐ वायव्यै दिशे वायवे ॥ ॐ उदीच्यै दिशे
सोमाय ॥ ॐ ईशान्यै दिशे ईश्वराय ॥ ॐ ऊर्ध्वायै दिशे दिव्यै ॥ ॐ अधरायै दिशे पृ
थिव्यै ॥ ॐ अंतरिक्षाय दिशे वायवे ॥ ॐ सर्वदेवताय दिशे सर्वदिशाभ्यः ॥ ॐ न
मः संध्यायै ॥ ॐ नमः ऋषिभ्यो ॥ ॐ नमः सर्वाभ्यो देवताभ्यः ॥ ॐ ब्राह्मणेभ्यः ॥
ॐ विश्वेभ्यो नमः ॥ स्योना पृथिवी त्वस्य मंत्रस्य काण्वो मेधातिथिर्ऋषिः ॥ भू
मिर्देवता गायत्री छंदः ॥ भूमि प्रार्थनेन स्तरणे विनियोगः ॥ ॐ स्योना

पृथिवीभवाःऋष्कः॥२॥ अथवेदोक्तनगान शान्तःशाखा याध्याय्येनंचामुक।
गोत्रोत्पन्नोहं॥ अमुकशर्माणंअहंभोअभिवादयामि॥ यथाभिविधिगोत्रो
च्चारणं॥ अतोदेवाऽतिद्वयोःप्रस्कण्वकाण्वमेधातिथिऋषिः॥ आद्यःदे
वादेवताद्वितीयाविष्णुर्देवता॥ गायत्रीछंदःसर्वांगस्पर्शनेविनियोगः॥
ओंअतोदेवाअवंतुनोऽतिवर्गः॥२॥ नमोब्रह्मणऽतिमंत्रस्यसंवननऋषिः
संज्ञानंदेवतात्रिष्टुप्छंदःशांत्यर्थेजपेविनियोगः॥ ओंनमोब्रह्मणेन
मोअस्त्वग्नयेनमःपृथिव्यैनमःओषधीभ्यः॥ नमोवाचेनमोवाचस्पतये
नमोविष्णवेमहतेकरोमि॥ ओंब्रह्मभूर्भुवःस्वः॥ ओंशांतिःत्रिः॥ ध्यायंसदास
र्वे भूतानिस्थावराणिचराणिच॥ सायंप्रातर्नमस्यंतिसासंध्याभिरक्ष
तुमामान्यंअभिरक्षत्वानमः॥२॥ ब्रह्मण्यपादेवकीपुत्रोब्रह्मण्योमधुसू
दनः॥ ब्रह्मण्यःपुंडरीकाक्षोब्रह्मण्योविष्णुरर्चितः॥ यःशिवायविष्णुरूपा
यशिवरूपायविष्णवे॥ शिवस्यहृदयंविष्णुर्विष्णोश्चहृदयंशिवः॥२॥ यथा

सं·
२

शिवमयं विष्णुः सर्वं विष्णुमयं जगत् ॥ यथांतरं न पश्यामि तथा मे स्वस्तिरायु
षः ॥ ४ ॥ क्षीरेणस्नापिता देवी चंदनेन विलेपिता ॥ बिल्वपत्रार्चिता देवी अहं दुर्गा
शरणागतः ॥ दुर्गेण शरणागतो नमः ॥ ५ ॥ नमो ब्रह्मण्य देवाय गोब्राह्मणहि
ताय च ॥ जगद्धिताय कृष्णाय गोविंदाय नमो नमः ॥ ६ ॥ नमोस्त्वनंताय ॥ ७ ॥
आकाशात्पतितं तोयं यथा गच्छति सागरं ॥ सर्वदेवनमस्कारं केशवं प्रतिग
च्छति ॥ ८ ॥ उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि ॥ ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ
देवी यथासुखं ॥ ९ ॥ यस्य स्मृत्या ॥ १० ॥ प्रमादात्कुर्वतां कर्म ॥ ११ ॥ अनेन प्रातः
संध्यावंदनेन भगवान् श्रीपरमेश्वरः प्रीयतां न मम ॥ ॐ तत्सत् ब्रह्मार्प
णमस्तु ॥ विष्णवे नमो ॥ इति प्रातःसंध्या समाप्तः ॥ ॥ अथ मध्याह्नसंध्याप्रारं
भः ॥ आचम्य प्राणायामं कृत्वा पूर्ववत् ॥ अथ मध्याह्नसंध्याध्यानं कृत्वा
सावित्रीं युवतीं श्वेतांगीं श्वेतवर्णां श्वेतवाससां त्रिनेत्रां वरदां तमालां त्रि
शूलभयहस्तां वृषभारूढां यजुर्वेदसंहितां रुद्रदैवत्यां तमोगुणयुतां

लोकव्यवस्थितां ॥ आदित्यपथगामिनी ॥ आवाहयाम्यहं देवीमाया-
सूर्यमंडलात् ॥ अथप्राणायामपूर्ववत् ॥ श्रीपरमेश्वरप्रीत्यर्थं म-
ध्याह्नसंध्याउपासिष्ये ॥ आपोहिष्ठेतिपूर्ववत्नवमार्जनंकृत्वा ॥ अथ
उदकंगृहीत्वा ॥ आपःपुनंत्वितिमंत्रस्यनारायणऋषिः आपःपृथिवी
त्वसादेवता अष्टिछंदः ॥ आभ्यंतरशुध्यर्थेउदकप्राशनेविनियोगः ॥ ओं
आपःपृथिवीपृथिवीपूतापुनातुमां ॥ पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातु
मां ॥ यदुच्छिष्टमभोज्यंचायद्वादुश्चरितंमम ॥ सर्वंपुनंतुमामापोसतांच
प्रतिग्रहं॰स्वाहा ॥ पुनराचम्य ॥ आपोहिष्ठेतिनवऋचेनपूर्ववत्मार्ज-
नंकृत्वा ॥ ऋतंचेतिअघमर्षणंकृत्वा ॥ पुनःआचमनं ॥ अथअर्घत्रयं
दत्वा ॥ आकृष्णेनेतिमंत्रस्य ॥ आंगिरसोहिरण्यस्तूपऋषिः सूर्योदेवता
त्रिष्टुपछंदः सूर्यअर्घ्यप्रदानेविनि॰ ॥ ओं आकृष्णेनरजसावर्त्तमानोऋ
कृ ॥ श्रीसूर्यायइदमर्घ्यंदत्तंनमम ॥ त्रिवारमंत्रेणअर्घ्यंदद्यात् ॥ ओंउता
ति

सं·
१·

यातं संगवे प्रातरह्नः ऋ॰ क्रु॰ इति पठित्वा॥ प्रदक्षिणं कृत्वा॥ आचम्य॥ अथ यज्ञ
तैलतर्पणं॥ अथ संध्यातर्पणं॥ गायत्र्याः कश्यप ऋषिः सविता देवता त्रिष्टुप् छंदः
मध्याह्ने संध्यातर्पणे विनि॰॥ ॐ भुवः पुरुषं तर्प॰॥ ॐ यजुर्वेदं तर्प॰॥ ॐ मंडलं
तर्प॰॥ ॐ हिरण्यगर्भं तर्प॰॥ ॐ अंतरात्मानं तर्प॰॥ ॐ सावित्रीं तर्प॰॥ ॐ वेदमात
रं तर्प॰॥ ॐ सांकृतिं तर्प॰॥ ॐ संध्यां तर्पण॰॥ ॐ युवतीं तर्प॰॥ ॐ रुद्राणीं तर्प॰॥ ॐ
उषसीं तर्प॰॥ ॐ निम्रुजीं तर्प॰॥ ॐ सर्वार्थसिद्धिकरीं तर्प॰॥ ॐ सर्वमंत्राधिपतीं
तर्प॰॥ २४॥ ॐ भूर्भुवः स्वः पुरुषं तर्पयामि॥ इति मध्याह्न संध्या तर्पणं॥ अथ उप
स्थानं॥ उदुत्यमिति त्रयोदशर्चस्य सूक्तस्य॥ कण्वपुत्रः प्रस्कण्व ऋषिः सूर्यो
देवता॥ नवाद्या गायत्री छंदः अंत्याश्चतस्रोऽनुष्टुप् सूर्योपस्थाने विनि॰॥ ॐ
उदुत्यं जातवेदसं॰ वर्गः॥ ३॥ चित्रं देवानामिति षडृचस्य सूक्तस्य आंगिरस
पुत्रः कुत्स ऋषिः सूर्यो देवता त्रिष्टुप् छंदः सूर्योपस्थाने विनि॰॥ ॐ चित्रं
देवानामुदगादनीकं॰ वर्गः॥ ३॥ सविता पश्चातात्॰ ऋ॰ क्रु॰॥ स्योना पृथिवी भव॥

शेषंपूर्ववत्तत्रक्तं ॥ १ ॥ अग्नोदेवाइतिपत्नीनांछंदऋषिःशेषंपूर्ववत् ॥ ओं अग्नोदेवा
अवंतुनोत्रस्कं ॥ २ ॥ अथगायत्रीजपः ॥ मध्याह्निकगायत्रीध्याने ॥ रौद्रीं शुभ्रतनुं ।
तमोगुणयुतां शुभ्रां कृष्णासोज्वलां करतां चाक्ष चतुर्भुजां सितवृषां रूढामम्बुजरूढ
युतिं ॥ खट्वांगाभयसूलसन्नविलसत्पाणिं यजुरूपिणीं सावित्रीं रविमार्गगां च ।
युवतीं मध्यंदिने संस्मरेत् ॥ ३ ॥ अथगायत्रीजपं कुर्यात् ॥ सहस्रजपं वा शतजपं
इति जपसमाप्तं लघुन्यासं कृत्वा ॥ प्रमादात्कुर्वतां कर्म ॥ विष्णवे नमो ॥ ओं तत्सद्ब्र
पे ह्मार्पणमस्तु ॥ इति मध्याह्नसंध्यासमाप्ता ॥ अथ सायाह्नसंध्याप्रारंभः ॥ आचमनप्रा
णायामं ॥ प्रातःसंध्यापूर्ववत् ॥ अथ सायंसंध्याध्याने ॥ सायाह्ने संध्यासरस्वतीं
वृद्धां कृष्णांगीं कृष्णवाससां शंखचक्रगदापद्म हस्तां गरुडारूढां विष्णुदैवत्यां सा
मवेदसहितां सत्वगुणयुतां स्वर्लोकव्यवस्थितां ॥ आदित्यपथगामिनीं आवाहया
म्यहं देवीमायांतीं सूर्यमंडलात् ॥ एवीच्छरितनएवंगुणविशेषेण ॥ ममोपात्त सा
यं संध्यामुपा ॥ आपोहिष्ठेति प्रातःसंध्यापूर्ववत् ॥ अग्निश्चेति मंत्रस्य नारायण ऋ

षिः अग्निर्वामन्युर्मन्युपतयो रात्रिश्च देवता प्रकृतिछंदः आचमने विनि॰॥ ॐ अग्नि
श्च मा मन्युश्च॰ यदह्ना पापमकार्षं मनसा॰ अहस्तदः सत्ये ज्योतिषि जुहोमि॰॥
प्रातःसंध्याशेषं पूर्ववत्॥ आपोहिष्ठेति नवर्च च समस्तेन एकोनविंशतिमार्जनं
कृत्वा॥ ऋतं चेत्यघमर्षणं कृत्वा॥ आचम्य॥ गायत्र्या गायत्रीछंदः विश्वामित्र ऋ
षिः सरस्वती देवता सरस्वत्यर्घ्यप्रदाने विनि॰॥ ॐ भूर्भुवः स्वः गायत्रीमंत्रमुच्चा
र्य॥ श्रीसूर्यनारायणाय श्री[illegible]त्वती इदमर्घ्यं न मम॥ प्रातःसंध्याशेषं पूर्ववत्
ॐ मोघाद्य॰ ऋरकृ॥ इति मंत्रेण प्रदक्षिणं कृत्वा॥ आचम्य प्राणायामं कृत्वा॥ दृष्टिदि
प्रातःसंध्यावन्द्यामा साविक॰मुद्रां कृत्वा॥ आयाहि वरदे देवीति सर्वं पूर्ववत् पठित्वा
अथ गायत्रीजपः॥ अथ सायाह्नसंध्यातर्पणं कृत्वा॥ सरस्वत्या वसिष्ठऋषिः विश्व
देवता सरस्वती छंदः सायाह्नसंध्यातर्पणे विनि॰॥ ॐ स्वः पुरुषं तर्पयामि॥ ॐ सा
मवेदं तर्प॰॥ ॐ महर्लोकं तर्प॰॥ ॐ हिरण्यगर्भ॰॥ ॐ परमात्मानं॥ ॐ सरस्वतीं तर्प॰॥ ॐ वेद
मातरं तर्प॰॥ ॐ संकृतिं तर्प॰॥ ॐ संध्यां तर्प॰॥ ॐ वृद्धां तर्प॰॥ ॐ विष्णुरूपिणीं तर्प॰॥

सं०
२२

ॐ उग्रसीं तर्प० ॥ ॐ विमृजीं तर्प० ॥ ॐ सर्वार्थसिद्धिकरीं तर्प० ॥ ॐ सर्वमंत्राधिपतिं
तर्प० ॥ ॐ भूर्भुवः स्वः पुरुषं तर्पयामि ॥ १८ ॥ अथ उपस्थानं ॥ ॐ यच्चिद्धि दर्श ऋचां
अजीगर्तिः शुनःशेप विश्वामित्रो देवरात ऋषिः ॥ सरस्वती देवता गायत्री छंदः
सरस्वती उपस्थाने जपे विनि० ॥ ॐ यच्चिद्धि ते विशो यथा० ऋक् ॥ १ ॥ वयमद्येति
मंत्रस्य अगस्त्य ऋषिः मरुतो देवता त्रिष्टुप् छंदः मरुत प्रार्थने विनि० ॥ ॐ वय
मद्येन्द्रस्य प्रेष्ठा० ऋक् ॥ १ ॥ गणानां त्वेति मंत्रस्य शौनको गृत्समद ऋषिः ॥ गणप
तिर्देवता जगती छंदः गणपति दैवं प्रार्थने विनि० ॥ ॐ गणानां त्वा० ऋक् ॥ १ ॥ जातवेद
स इति मंत्रस्य० पूर्ववत् ॥ त्र्यंबक इति मंत्रस्य शेषं पूर्ववत् ॥ तच्छंयोरिति मंत्रस्य शेषं पू० ॥
प्राच्यै दिशे दिग्भ्य दिग्प्रातःसंध्यावत् ॥ स्योना पृथिवीत्यस्य पूर्ववत् ॥ वेदशाखागोत्र
प्रवरनाम यथाविधि उच्चारणं शेषं पूर्व० ॥ अतो देवा शेषं पू० ॥ नमो ब्रह्मणे० पूर्व० ॥ यां
सदा सर्वभूतानि० सर्वं शेषं प्रातःसंध्या पूर्ववत् ॥ यस्य स्मृत्या० प्रमादात्कुर्वतां० ॥ ॐ तत्स
द्ब्रह्मार्पणमस्तु ॥ विष्णवे नमो० ॥ इति विश्वामित्रकल्पे त्रिकालसंध्याविधानं समाप्तं ॥